अध्याय 5: एषा सा कृतकबुद्धिः मानवबुद्धेः सहकरी

विषय-सूची

15 प्रश्नावली · 72 प्रश्न

प्रश्नावली अभ्यास 1	पाठस्य आधारेण अधोलिखितानां प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत	9 प्रश्न
प्रश्नावली अभ्यास 2	मेलनं कुरुत – तन्त्रांशानां कार्याणि विचिन्त्य यथोचितं विकल्पं चिनुत	1 प्रश्न
प्रश्नावली अभ्यास 3	अधः प्रदत्तमञ्जूषातः शब्दान् चित्वा रिक्तस्थानानि पूरयत	9 प्रश्न
प्रश्नावली अभ्यास 5	अधोलिखितानि वाक्यानि पठित्वा शुद्धम् (✓) अशुद्धं (✗) वा चिनुत	7 प्रश्न
प्रश्नावली अभ्यास 7	अधोलिखित-वाक्येषु कर्तृपदं क्रियापदं च चिनुत	1 प्रश्न
प्रश्नावली अभ्यास 8	अधोलिखितेषु वाक्येषु विशेषणं विशेष्यं च चिनुत	1 प्रश्न
प्रश्नावली पठितावबोधनम् 1	प्रथमगद्यांशम् आधृत्य प्रश्नोत्तराणि (एकपदेन / पूर्णवाक्येन / यथानिर्देशम्)	8 प्रश्न
प्रश्नावली पठितावबोधनम् 2	द्वितीयगद्यांशम् आधृत्य प्रश्नोत्तराणि	8 प्रश्न
प्रश्नावली पठितावबोधनम् 3	तृतीयगद्यांशम् आधृत्य प्रश्नोत्तराणि	8 प्रश्न
प्रश्नावली पठितावबोधनम् 4	चतुर्थगद्यांशम् आधृत्य प्रश्नोत्तराणि	8 प्रश्न
प्रश्नावली पठितावबोधनम् 5	पञ्चमगद्यांशम् आधृत्य प्रश्नोत्तराणि	8 प्रश्न
प्रश्नावली व्याकरण 2	अधोलिखितवाक्येषु स्थूलाक्षरपदानि आश्रित्य प्रश्ननिर्माणं कुरुत	1 प्रश्न
प्रश्नावली व्याकरण 3	पर्यायवाचि-पदानां मेलनं कुरुत	1 प्रश्न
प्रश्नावली व्याकरण 4	अधोलिखितानां पदानां विपरीतार्थक-पदानाम् उचितं मेलनं कुरुत	1 प्रश्न
प्रश्नावली व्याकरण 5	विग्रहं कृत्वा लिखत	1 प्रश्न

प्रश्नावली अभ्यास 1 — पाठस्य आधारेण अधोलिखितानां प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत

प्रश्न 1

(क) कृतकबुद्धिः का अस्ति ?

हल

पाठे वैज्ञानिकानां मतम् उद्धृत्य उत्तरं दीयते ।

उत्तर: यया अचेतनयन्त्राणि मानवबुद्धिवत् कार्यं कुर्वन्ति, सा कृतकबुद्धिः इति वैज्ञानिकाः मन्यते ।

प्रश्न 2

(ख) अध्यापकः कृतकबुद्धेः कानि उदाहरणानि उक्तवान् ?

हल

पाठे उक्तानि अनुप्रयुक्ततन्त्रविशेषाणि उदाहरणरूपेण दीयन्ते ।

उत्तर: अध्यापकः चैट – जीपीटी, सिरि, एलेक्सा, गूगलमानचित्रं, जेमिनि, मेटा- कृतकबुद्धिः, परप्लेक्सिटिचेत्यादयः अनुप्रयुक्ततन्त्रविशेषाः कृतकबुद्धेः उदाहरणानि उक्तवान् ।

प्रश्न 3

(ग) यन्त्राणि कथं शिक्ष्यन्ते ?

हल

यन्त्राणां शिक्षणस्य माध्यमं पाठे उक्तम् ।

उत्तर: यन्त्राणि दत्तांशमाध्यमेन शिक्ष्यन्ते ।

प्रश्न 4

(घ) 'डेटासेट्' केषां पाठशाला अस्ति?

हल

पाठे 'डेटासेट्' यन्त्रपाठशालारूपेण वर्णितम् ।

उत्तर: 'डेटासेट' यन्त्राणां पाठशाला अस्ति ।

प्रश्न 5

(ङ) कृतकबुद्धिः कुत्र प्रयुज्यते ?

हल

पाठे कृतकबुद्धेः प्रयोगक्षेत्राणि गणितानि ।

उत्तर: कृतकबुद्धि: शिक्षायां, चिकित्सायां कृषिक्षेत्रे, न्यायालये, सञ्चारे, वित्ते, कलासङ्गीतक्षेत्रे, मनोरञ्जनादिषु क्षेत्रेषु च प्रयुज्यते ।

प्रश्न 6

(च) शिक्षायां कृतकबुद्धेः उपयोगः कथं भवति ?

हल

शिक्षाक्षेत्रे प्रयुज्यमानानि ए.आई. उपकरणानि च तेषां लाभाः पाठे उक्ताः ।

उत्तर: दीक्षा, स्वयं, सर्वेषां कृते कृतबुद्धिः, पी.एम.ई – विद्या, संशयनिराकरणार्थं चैट्बोट्, भाषानुवादोपकरणानि च यत्र-तत्र प्रयुज्यन्ते । एतेषां साहाय्येन छात्राः शिक्षकाणाम् अनुपस्थितौ अपि स्वयम् अध्येतुं शक्नुवन्ति ।

प्रश्न 7

(छ) यदि अशुद्धदत्तांश: दीयते तर्हि का समस्या भवति ?

हल

पक्षपातयुक्तदत्तांशस्य परिणामः पाठे स्पष्टीकृतः ।

उत्तर: यदा प्रशिक्षणदत्तांशः पक्षपातयुक्तः भवति, तदा निष्कर्षाः अपि पक्षपातयुक्ताः भवन्ति ।

प्रश्न 8

(ज) कृतकबुद्धेः दुरुपयोगेन कीदृशं भयम् अस्ति ?

हल

दुरुपयोगजन्यानि साइबर-अपराधानि डीप्-फेक्-समस्या च पाठे वर्णिते ।

उत्तर: अद्यत्वे कृतकबुद्धेः दुरुपयोगेन हि विभिन्न प्रकारकाः साइबर अपराधाः समाजेषु देशेषु च चलन्ति। डीप्-फेक् समस्यामाध्यमेन मिथ्यादृश्ये यत्र मुखं वाणी च मिथ्या प्रस्तूयते ।

प्रश्न 9

(झ) 'कृतकबुद्धि मित्रं भवेत्, न भवेत् स्वामी' इति वाक्यस्य कः अर्थ : ?

हल

वाक्यस्य भावः उपायाश्च पाठे निरूपिताः ।

उत्तर: अस्य अभिप्रायोऽस्ति यत् कृतकबुद्धि: मानवस्य साहाय्यार्थं भवेत्, तस्य नियन्त्रणाय न । अतः कृतकबुद्धिसाक्षरता, नैतिकतापूरितं प्रशिक्षणं सर्वकारेण नियन्त्रणम्, आत्मनियन्त्रणं चेति विविधाः उपायाः अस्माभिः करणीयः ।

प्रश्नावली अभ्यास 2 — मेलनं कुरुत – तन्त्रांशानां कार्याणि विचिन्त्य यथोचितं विकल्पं चिनुत

प्रश्न 1

स्तम्भः अ (तन्त्रांशाः) तथा स्तम्भः ब (कार्याणि) एतयोः मेलनं कुरुत ।

हल

प्रत्येकस्य तन्त्रांशस्य कार्यानुसारं मेलनं क्रियते ।

उत्तर: (क) चैट-जीपीटी → ४. संवादयन्त्रम् ; (ख) डीप्-फेक् → ७. मिथ्याचित्रस्य निर्माणम् ; (ग) शिक्षकः → १. नैतिकतायाः शिक्षां करोति ; (घ) एलेक्सा → ६. गीतं गायति, दीपं प्रकाशितं करोति च ; (ङ) डेटासेट् → ९. यन्त्रपाठशालायाः नाम ; (च) दीक्षा → २. ए. आई. आधारित – शिक्षाप्रणाली ; (छ) अपूर्वानुमेय – नियन्त्रणम् (Predictive Policing) → १०. अपराधशमनाय प्रयोगः ; (ज) गूगल मानचित्रं → ३. पथनिर्देशनं करोति ; (झ) पूर्वग्रहः → ५. पक्षपातयुक्तं प्रशिक्षणफलम् ; (ञ) दॅल्ल्-ई (DALL-E) → ८. चित्रोत्पादनाय ए.आई. अनुप्रयोगः ।

प्रश्नावली अभ्यास 3 — अधः प्रदत्तमञ्जूषातः शब्दान् चित्वा रिक्तस्थानानि पूरयत

प्रश्न 1

(क) यन्त्राणां शिक्षणाय ..... नामकः दत्तांशसमूहः उपयुज्यते ।

हल

यन्त्रपाठशालायाः नाम डेटासेट् इति ।

उत्तर: डेटासेट्

प्रश्न 2

(ख) चैट-जीपीटी, एलेक्सा, सिरि इत्यादीनि ..... इत्यस्य उदाहरणानि सन्ति ।

हल

एतानि सर्वाणि कृतकबुद्धेः उदाहरणानि ।

उत्तर: कृतकबुद्धिः

प्रश्न 3

(ग) यः मनुष्यवत् प्रश्नोत्तरं करोति, सः ..... इति उच्यते।

हल

संवादं कुर्वत् यन्त्रं संवादयन्त्रम् इति ।

उत्तर: संवादयन्त्रम्

प्रश्न 4

(घ) यदा पक्षपातयुक्तः दत्तांशः प्रयुज्यते तर्हि कृतकबुद्धिः अपि ..... करोति।

हल

पक्षपातजन्यः दोषः पूर्वाग्रहः इति ।

उत्तर: पूर्वाग्रहः

प्रश्न 5

(ङ) ..... सदैव करुणां विवेकं च शिक्षयन्ति, कृतबुद्धिः तु तस्य सहायिका अस्ति ।

हल

मानवमूल्यानि शिक्षकाः एव शिक्षयन्ति ।

उत्तर: शिक्षक:

प्रश्न 6

(च) कृतकबुद्धिः यन्त्राणि अभ्यासेन ..... प्राप्नुवन्ति ।

हल

दत्तांशमाध्यमेन प्रशिक्षणं प्राप्नुवन्ति ।

उत्तर: प्रशिक्षणम्

प्रश्न 7

(छ) मिथ्याचित्रं, मिथ्यावाणी च यदि कृतकबुद्ध्या निर्मीयते तर्हि सः दोषः ..... इति कथ्यते।

हल

मिथ्यानिर्माणं डीप्-फेक् इति ।

उत्तर: डीप्-फेक्

प्रश्न 8

(ज) ड्रोनस्य माध्यमेन बीज – वपनं, भूमिक्षमतापरीक्षणं च ..... भवति ।

हल

एतत् सर्वं कृषिक्षेत्रे भवति ।

उत्तर: कृषिक्षेत्रे

प्रश्न 9

(झ) यदा कृतकबुद्धिः विवेकहीनतया उपयुज्यते तर्हि ..... हानिं प्राप्नोति ।

हल

विवेकहीनप्रयोगे नैतिकता हानिं प्राप्नोति ।

उत्तर: नैतिकता

प्रश्नावली अभ्यास 5 — अधोलिखितानि वाक्यानि पठित्वा शुद्धम् (✓) अशुद्धं (✗) वा चिनुत

प्रश्न 1

(क) आर्यः यशिका च विद्यालये कृतकबुद्धेः उपयोगं कुरुत ।

हल

पाठानुसारं असत्यम् ।

उत्तर: ✗

प्रश्न 2

(ख) कृतकबुद्धिः केवलं विनोदानुकूलम् उपकरणम् अस्ति।

हल

कृतकबुद्धिः बहुक्षेत्रेषु प्रयुज्यते, अतः असत्यम् ।

उत्तर: ✗

प्रश्न 3

(ग) अथर्वः अपि शिक्षायां कृतकबुद्धेः प्रयोगं करोति ।

हल

पाठानुसारं सत्यम् ।

उत्तर: ✓

प्रश्न 4

(घ) अक्षतः चैटबोट् इत्यस्य साहाय्येन उपन्यासलेखनं करोति ।

हल

पाठानुसारं असत्यम् ।

उत्तर: ✗

प्रश्न 5

(ङ) ए.आइ.डीप्-फेक् इत्यपि कश्चन दुरुपयोगः अस्ति ।

हल

डीप्-फेक् दुरुपयोगः एव, अतः सत्यम् ।

उत्तर: ✓

प्रश्न 6

(च) आर्यः चित्रनिर्माणाय कृतकबुद्धेः साहाय्यं प्राप्नोति ।

हल

पाठानुसारं असत्यम् ।

उत्तर: ✗

प्रश्न 7

(छ) शिक्षकः गम्भीरतया चैट्बोट् वाक्यानां मूल्याङ्कनं करोति।

हल

पाठानुसारं सत्यम् ।

उत्तर: ✓

प्रश्नावली अभ्यास 7 — अधोलिखित-वाक्येषु कर्तृपदं क्रियापदं च चिनुत

प्रश्न 1

प्रदत्तवाक्येषु कर्तृपदं क्रियापदं च पृथक् कुरुत ।

हल

प्रत्येकवाक्ये कर्ता (कर्तृपदम्) तस्य क्रिया (क्रियापदम्) च पृथक् क्रियते ।

उत्तर: कर्तृपदम् – क्रियापदम् : (क) आर्यः – आसीत ; (ख) यशिका – वर्णयति ; (ग) शिक्षकः – सूचयति ; (घ) अथर्वः – दत्तवान् ; (ङ) वेदः – विवेचयति ।

प्रश्नावली अभ्यास 8 — अधोलिखितेषु वाक्येषु विशेषणं विशेष्यं च चिनुत

प्रश्न 1

प्रदत्तवाक्येषु विशेषणं विशेष्यं च पृथक् कुरुत ।

हल

प्रत्येकवाक्ये गुणवाचकं विशेषणं तेन विशिष्टं विशेष्यं च पृथक् क्रियते ।

उत्तर: विशेषणम् – विशेष्यम् : (क) अतिसक्रियम् – संगणकयन्त्रम् ; (ख) गम्भीरम् – गवेषणम् ; (ग) सुबोधा – प्रस्तुतिः ; (घ) सुस्पष्टः – सन्देशः ; (ङ) आधुनिकः – दृष्टिकोणः ।

प्रश्नावली पठितावबोधनम् 1 — प्रथमगद्यांशम् आधृत्य प्रश्नोत्तराणि (एकपदेन / पूर्णवाक्येन / यथानिर्देशम्)

प्रश्न 1

I. एकपदेन उत्तरत- यन्त्रपाठशालायाः नाम किम् अस्ति ?

हल

गद्यांशे यन्त्रपाठशालायाः नाम डेटासेट् इति ।

उत्तर: डेटासेट्

प्रश्न 2

I. एकपदेन उत्तरत- कृतकबुद्धिः यन्त्रं कथं शिक्षणं करोति ?

हल

दत्तांशमाध्यमेन यन्त्रं शिक्षणं करोति ।

उत्तर: दत्तांशमाध्यमेन

प्रश्न 3

I. एकपदेन उत्तरत- यदि अशुद्धदत्तांशः दीयते तर्हि कृतकबुद्धिः किं करोति?

हल

अशुद्धदत्तांशेन कृतकबुद्धिः त्रुटिं करोति ।

उत्तर: त्रुटिं

प्रश्न 4

II. पूर्णवाक्येन उत्तरत- कृतकबुद्धिः केषु स्थलेषु उपयुज्यते ?

हल

गद्यांशे गणितानि प्रयोगक्षेत्राणि उल्लिख्यन्ते ।

उत्तर: कृतकबुद्धिः शिक्षायां चिकित्सालयेषु, कृषिक्षेत्रे, न्यायालये, सञ्चारे, वित्ते, कलासंगीतक्षेत्रे मनोरञ्जनादिषु क्षेत्रेषु उपयुज्यते ।

प्रश्न 5

II. पूर्णवाक्येन उत्तरत- कीदृशः दोषः 'पूर्वग्रहः ' कथ्यते ?

हल

पक्षपातयुक्तदत्तांशजन्यः दोषः एव पूर्वग्रहः ।

उत्तर: यदि प्रशिक्षणदत्तांशः पक्षपातयुक्तः भवति, तदा निष्कर्षाः अपि पक्षपातयुक्ताः भवन्ति । एषः दोषः पूर्वग्रहः कथ्यते ।

प्रश्न 6

III. यथानिर्देशम्- 'तव प्रश्न: .....।' अत्र 'तव' इति सर्वनामपदं कस्यै प्रयुक्तम् ? (क) श्रेयायै (ख) अध्यापकाय (ग) श्रेया (घ) यशिकायै

हल

अध्यापकः श्रेयाम् उद्दिश्य 'तव' इति उक्तवान् ।

उत्तर: (क) श्रेयायै

प्रश्न 7

III. यथानिर्देशम्- 'भूरिशः' इत्यस्य पदस्य कः अर्थः ? (क) प्रचुर: (ख) सह (ग) एषा (घ) सञ्चारे

हल

'भूरिशः' इत्यस्य अर्थः प्रचुरः (बहुधा) ।

उत्तर: (क) प्रचुर:

प्रश्न 8

III. यथानिर्देशम्- 'कृतकबुद्धिः अपि त्रुटिं करोति' अत्र कर्तृपदं किम्? (क) अपि (ख) त्रुटिं (ग) कृतकबुद्धिः (घ) करोति

हल

क्रियायाः 'करोति' कर्ता कृतकबुद्धिः ।

उत्तर: (ग) कृतकबुद्धिः

प्रश्नावली पठितावबोधनम् 2 — द्वितीयगद्यांशम् आधृत्य प्रश्नोत्तराणि

प्रश्न 1

I. एकपदेन उत्तरत- केषां साहाय्येन छात्रा : शिक्षकाणाम् अनुपस्थितौ अपि स्वयम् अध्येतुं शक्नुवन्ति ?

हल

कृतकबुद्ध्याधारितोपकरणानां साहाय्येन ।

उत्तर: कृतकबुद्ध्याः उपकरणाणाम्।

प्रश्न 2

I. एकपदेन उत्तरत- मानवशिक्षकः किं प्रयोजनरहितं भविष्यति इति कः कं प्रति पृच्छति?

हल

आकाशः अध्यापकं प्रति पृच्छति ।

उत्तर: आकाशः अध्यापकं प्रति ।

प्रश्न 3

I. एकपदेन उत्तरत- चैट्बोट् किमर्थं प्रयुज्यते ?

हल

संशयनिराकरणार्थं चैट्बोट् प्रयुज्यते ।

उत्तर: संशयनिराकरणार्थं ।

प्रश्न 4

II. पूर्णवाक्येन उत्तरत- ए.आई. आधारित शिक्षाप्रणाली काः सन्ति?

हल

गद्यांशे गणिताः ए.आई. आधारितशिक्षाप्रणाल्यः ।

उत्तर: दीक्षा, स्वयं, पी. एम्. ईविद्या इत्यादयः ए.आई. आधारित – शिक्षाप्रणालीः सन्ति ।

प्रश्न 5

II. पूर्णवाक्येन उत्तरत- कृतकबुद्ध्याधारितानि उपकरणानि के सन्ति?

हल

चैट्बोट् भाषानुवादोपकरणानि च एतानि उपकरणानि ।

उत्तर: चैट्बोट्, भाषानुवादोपकरणानि च कृतक- बुद्ध्याधारितानि उपकरणानि सन्ति ।

प्रश्न 6

III. यथानिर्देशम्- 'मानवशिक्षकः किं ..... '?' अस्मिन् वाक्ये कर्तृपदं किम्? (क) प्रयोजनरहितः (ख) एतेषां (ग) कारणेन (घ) मानवशिक्षकः

हल

वाक्यस्य कर्ता मानवशिक्षकः ।

उत्तर: (घ) मानवशिक्षकः

प्रश्न 7

III. यथानिर्देशम्- 'अध्ययनं कर्तुम्' इति अर्थे किं समानार्थकं पदं प्रयुक्तम्? (क) अध्येतुम् (ख) साहाय्येन (ग) उपकरणानि (घ) शक्नुवन्ति

हल

'अध्येतुम्' इति 'अध्ययनं कर्तुम्' इत्यस्य समानार्थकम् ।

उत्तर: (क) अध्येतुम्

प्रश्न 8

III. यथानिर्देशम्- 'संशयः' इति पदस्य विलोमपदं किम् ? (क) सन्देहः (ख) निश्चयः (ग) शंका (घ) समाधान

हल

'संशयः' इत्यस्य विलोमः निश्चयः ।

उत्तर: (ख) निश्चयः

प्रश्नावली पठितावबोधनम् 3 — तृतीयगद्यांशम् आधृत्य प्रश्नोत्तराणि

प्रश्न 1

I. एकपदेन उत्तरत- छात्रेषु व्यक्तित्वविकासः कथं भवति?

हल

शिक्षकाणां सान्निध्ये व्यक्तित्वविकासः भवति ।

उत्तर: शिक्षकाणां सान्निध्ये

प्रश्न 2

I. एकपदेन उत्तरत- छात्रेषु शिक्षकाः मानवीयमूल्यबोधं केन जनयन्ति ?

हल

पुस्तकीयविज्ञानेन सह मूल्यबोधं जनयन्ति ।

उत्तर: पुस्तकीयविज्ञानेन

प्रश्न 3

I. एकपदेन उत्तरत- कृतकबुद्धिः मनुष्यस्य सहायिका अस्ति प्रतिस्पर्धिनी वा?

हल

कृतकबुद्धिः मनुष्यस्य सहायिका एव ।

उत्तर: सहायिका

प्रश्न 4

II. पूर्णवाक्येन उत्तरत- कृतकबुद्धिः चिकित्सायां कथं प्रयुज्यते ?

हल

गद्यांशे गणितानि चिकित्सोपकरणानि ।

उत्तर: रोबोटिक्-सर्जरी, रोग – पूर्वज्ञानं, रश्मिपरीक्षण विद्या, चैट कृतकबुद्धिः, औषधशुश्रूषा इत्यादीनि चिकित्सोपकरणानि चिकित्सायां प्रयुज्यन्ते ।

प्रश्न 5

II. पूर्णवाक्येन उत्तरत- शिक्षकाः छात्रान् किं शिक्षयन्ति ?

हल

शिक्षकाः मानवमूल्यानि शिक्षयन्ति ।

उत्तर: शिक्षिकाः छात्रान् अनुशासनं, परोपकारं, करुणां व्यवहारज्ञानं च शिक्षयन्ति ।

प्रश्न 6

III. यथानिर्देशम्- 'आगच्छति' इति क्रियापदस्य कर्तृपदं किम् ? (क) प्रेरणा (ख) मानव (ग) मानवेभ्यः (घ) कृतकबुद्धिः

हल

'प्रेरणा तु मानवेभ्यः एव आगच्छति' — कर्ता प्रेरणा ।

उत्तर: (क) प्रेरणा

प्रश्न 7

III. यथानिर्देशम्- 'प्रगाढ़' इति पदस्य कः अर्थः ? (क) दृढ़ (ख) चलं (ग) विचलं (घ) संशयं

हल

'प्रगाढ' इत्यस्य अर्थः दृढ ।

उत्तर: (क) दृढ़

प्रश्न 8

III. यथानिर्देशम्- 'विरोधिनी' इति पदस्य विपरीतार्थकं पदं किं प्रयुक्तम् ? (क) सहायिका (ख) प्रतिस्पर्धिनी (ग) उपकरणानि (घ) सान्निध्ये

हल

'विरोधिनी' इत्यस्य विपरीतम् सहायिका ।

उत्तर: (क) सहायिका

प्रश्नावली पठितावबोधनम् 4 — चतुर्थगद्यांशम् आधृत्य प्रश्नोत्तराणि

प्रश्न 1

I. एकपदेन उत्तरत- बीज – वपनं कथं भवति ?

हल

ड्रोनमाध्यमेन बीजवपनं भवति ।

उत्तर: ड्रोनमाध्यमेन

प्रश्न 2

I. एकपदेन उत्तरत- कः चैट-जीपीटी इत्यस्मात् श्लोकं प्राप्तवान्?

हल

वेदः चैट-जीपीटी इत्यस्मात् श्लोकं प्राप्तवान् ।

उत्तर: वेद:

प्रश्न 3

I. एकपदेन उत्तरत- 'कृतकबुद्धिः काव्यमपि रचयितुं समर्था: ?' इति का पृच्छति ?

हल

यशिका इति प्रश्नं पृच्छति ।

उत्तर: यशिका

प्रश्न 4

II. पूर्णवाक्येन उत्तरत- कृतकबुद्धिः कृषिक्षेत्रे कथं प्रयुज्यते ?

हल

गद्यांशे गणितानि कृषिकार्याणि ।

उत्तर: कृषिक्षेत्रे ड्रोनमाध्यमेन बीज – वपनं, कीटनिरीक्षणं, भूमिक्षमता – च इत्यादीनां परीक्षणम् अपि यन्त्रैः भवन्ति ।

प्रश्न 5

II. पूर्णवाक्येन उत्तरत- अपराधशमनाय कृतकबुद्धिः कथं साहाय्यं करोति ?

हल

मुखपरिचयप्रणाली पूर्वानुमेय-नियन्त्रणं च योजनासु प्रयुज्यते ।

उत्तर: मुखपरिचयप्रणाली, पूर्वानुमेय-नियन्त्रणं च इत्यादि-योजनासु कृतकबुद्धेः प्रयोगः अपराधशमनाय साहाय्यं करोति ।

प्रश्न 6

III. यथानिर्देशम्- 'करोति' इति क्रियापदस्य कर्तृपदं किम् ? (क) गुरुदेव! (ख) कृतकबुद्धिः (ग) साहाय्यं (घ) अपराध

हल

क्रियायाः 'करोति' कर्ता कृतकबुद्धिः ।

उत्तर: (ख) कृतकबुद्धिः

प्रश्न 7

III. यथानिर्देशम्- 'शमनाय' इति पदस्य पर्यायपदं किम् ? (क) निवारणाय (ख) शान्तं (ग) सहाय (घ) समर्थ

हल

'शमनाय' इत्यस्य पर्यायः निवारणाय ।

उत्तर: (क) निवारणाय

प्रश्न 8

III. यथानिर्देशम्- 'प्रयोगः' इति पदस्य विलोमपदं किम् ? (क) अनुप्रयोगः (ख) योगः (ग) युक्तः (घ) प्रयुक्तः

हल

प्रदत्तविकल्पेषु उत्तरं अनुप्रयोगः इति ।

उत्तर: (क) अनुप्रयोगः

प्रश्नावली पठितावबोधनम् 5 — पञ्चमगद्यांशम् आधृत्य प्रश्नोत्तराणि

प्रश्न 1

I. एकपदेन उत्तरत- 'कृतकबुद्धिः मित्रं भवेत्, न भवेत् स्वामी' इति वाक्यं कस्य मनः स्पृशति ?

हल

भास्करस्य मनः इदं वाक्यं स्पृशति ।

उत्तर: भास्करस्य

प्रश्न 2

I. एकपदेन उत्तरत- 'डीप्–फेक्' कस्य निर्माणं करोति?

हल

डीप्-फेक् मिथ्याचित्रस्य निर्माणं करोति ।

उत्तर: मिथ्याचित्रस्य

प्रश्न 3

I. एकपदेन उत्तरत- केषां निराकरणार्थम् उपायाः अस्माभिः करणीया: ?

हल

अपराधानां निराकरणार्थम् उपायाः करणीयाः ।

उत्तर: अपराधानाम्

प्रश्न 4

II. पूर्णवाक्येन उत्तरत- डीप्-फेक् इति किम् अस्ति ?

हल

गद्यांशे डीप्-फेक् इत्यस्य स्वरूपं वर्णितम् ।

उत्तर: डीप्-फेक् कृतकबुद्ध्या निर्मितं मिथ्याचित्रं, दृश्यं, ध्वनिः वा अस्ति ।

प्रश्न 5

II. पूर्णवाक्येन उत्तरत- अपराधस्य निराकरणार्थं के उपायाः अस्माभिः करणीया: ?

हल

गद्यांशे गणिताः विविधाः उपायाः ।

उत्तर: अपराधस्य निराकरणार्थं कृतकबुद्धिः साक्षरता, नैतिकतापूरितं प्रशिक्षणं, सर्वकारेण नियन्त्रणम्, आत्मनियन्त्रणं च इति विविधाः उपायाः अस्माभिः करणीयाः ।

प्रश्न 6

III. यथानिर्देशम्- 'उपायाः' इति पदस्य विशेषणपदं किम् ? (क) नियन्त्रणं (ख) अस्माभिः (ग) करणीयाः (घ) विविधाः

हल

'विविधाः उपायाः' — विशेषणं विविधाः ।

उत्तर: (घ) विविधाः

प्रश्न 7

III. यथानिर्देशम्- 'स्पृशति' इति क्रियापदस्य कर्त्तृपदं किम् ? (क) वाक्यं (ख) मम (ग) इति (घ) मनः

हल

'वाक्यं मम मनः स्पृशति' — कर्ता वाक्यम् ।

उत्तर: (क) वाक्यं

प्रश्न 8

III. यथानिर्देशम्- 'मम' इति सर्वनामपदं कस्मै प्रयुक्तम् ? (क) वेदाय (ख) भास्कराय (ग) अध्यापकाय (घ) भास्करः

हल

भास्करः 'मम मनः' इति उक्तवान्, अतः भास्कराय ।

उत्तर: (ख) भास्कराय

प्रश्नावली व्याकरण 2 — अधोलिखितवाक्येषु स्थूलाक्षरपदानि आश्रित्य प्रश्ननिर्माणं कुरुत

प्रश्न 1

स्थूलाक्षरपदानि आश्रित्य प्रदत्तवाक्यानां प्रश्ननिर्माणं कुरुत ।

हल

स्थूलपदस्थाने उचितं प्रश्नवाचकपदं योजयित्वा प्रश्नः निर्मीयते ।

उत्तर: (क) कृतकबुद्धिः कस्याः सहकरी अस्ति ? ; (ख) वयं कीदृशाः नागरिकाः भवाम? ; (ग) का मित्रं भवेत् ? ; (घ) कुत्र विविधाः साइबर् – अपराधाः भवन्ति ? ; (ङ) कस्य कारणं यथार्थम् अस्ति ? ; (च) कृतकबुद्धिः कीदृशी अस्ति ? ; (छ) कस्याः क्षेत्रे कृतकबुद्धिः प्रयुज्यते ? ; (ज) यन्त्राणि कथं चिन्तयन्ति ? ; (झ) कृतकबुद्धिः केन शिक्षणं करोति ? ; (ञ) प्रेरणा तु केभ्यः आगच्छति ?

प्रश्नावली व्याकरण 3 — पर्यायवाचि-पदानां मेलनं कुरुत

प्रश्न 1

अधोलिखितानां पदानां पर्यायवाचिपदानां मेलनं कुरुत ।

हल

प्रत्येकस्य पदस्य समानार्थकेन सह मेलनं क्रियते ।

उत्तर: (क) वाञ्छामः – इच्छामः ; (ख) सहकरी – सहयोगिनी ; (ग) तन्त्रांश: – संगणक-तन्त्रः ; (घ) अर्हन्ति – शक्नुवन्ति ; (ङ) दत्तांशः – पूर्वदत्तं ज्ञानं/डेटा ; (च) प्रतिस्पर्धिनी – प्रतियोगी ; (छ) शमनाय – निवारणाय ; (ज) अध्येतुम् – अध्ययनं कर्तुम् ; (झ) द्रुतगत्या – तीव्रतया ; (ञ) चिन्तनीयः – विचारणीयः ।

प्रश्नावली व्याकरण 4 — अधोलिखितानां पदानां विपरीतार्थक-पदानाम् उचितं मेलनं कुरुत

प्रश्न 1

अधोलिखितानां पदानां विपरीतार्थकपदानां मेलनं कुरुत ।

हल

प्रत्येकस्य पदस्य विलोमपदेन सह मेलनं क्रियते ।

उत्तर: (क) सामर्थ्य – अक्षम्य ; (ख) चर्चित – अप्रचलितम् ; (ग) युक्तम् – अयुक्तम् ; (घ) उपयोगं – दुरुपयोगं ; (ङ) करुणा – निष्ठुरता ; (च) समृद्धं – विपन्नं ।

प्रश्नावली व्याकरण 5 — विग्रहं कृत्वा लिखत

प्रश्न 1

अधोलिखितानां समस्तपदानां विग्रहं कृत्वा लिखत ।

हल

प्रत्येकं समस्तपदं तस्य सन्धि/समासघटकयोः विच्छेदेन लिख्यते ।

उत्तर: (क) मानवबुद्धिः – मानवस्य बुद्धिः ; (ख) सोत्साहं – उत्साहेन सह ; (ग) मानुषजीवनं – मानुषस्य जीवनं ; (घ) यन्त्रपाठशाला – यन्त्राणां पाठशाला ; (ङ) प्रमुखप्रकाराः – प्रमुखाः प्रकाराः ; (च) अपराधशमनाय – अपराधानां शमनाय ; (छ) भूमिक्षमता – भूमेः क्षमता ; (ज) कीटनिरीक्षणं – कीटानां निरीक्षणं ।